Annexure-3
2021-22
Annexure-3
Sabbir ...

ISSN 2278-0416

UGC CARE LISTED

# हरिप्रभा

अन्ताराष्ट्रिया मूल्याङ्किता त्रैमासिकी शोधपत्रिका

PEER REVIEWED, REFEREED, OPEN ACCESS, INDEXED
INTERNATIONAL QUARTERLY RESEARCH JOURNAL (UGC CARE LISTED)

वर्षम् : १६, अङ्क : ०४-०६, अप्रैल - जून, २०२२

हरियाणा संस्कृत अकादमी

देशोऽस्ति हरियाणाख्यः
पृथिव्यां स्वर्गसन्निभः

हरित्वता वर्चसा सूर्यस्य श्रेष्ठै रूपैस्तन्वं स्पर्शयस्व।
अस्माभिरिन्द्र सखिभिर्हुवानः सध्रीचीनो मादयस्वा निषद्य॥
(ऋक्० १०/११२/३)

... अकादमी पंचकला

१२. व्याकरणशास्त्रस्य परम्परा-विचारः ९४
-शिवदेव आर्यः

१३. अद्वैतमतानुसारेण ब्रह्मणः स्वरूपं मुक्तिस्तथा मुक्तिसाधनम् १०३
-डॉ. आलोककुमारसेमवालः

१४. पर्यावरणेन साकं सांख्यदर्शनस्य प्रकृतितत्त्वस्य सम्बन्धः-अध्ययनमेकम्
-सूरज रॉय १०८

१५. दिनकर्यनुगुणं जातिशक्तिवादः -राज्यगुरु जयदेव धीरुभाई ११५

१६. मूलाविद्या भगवत्पादसम्मता -वाचस्पतिशास्त्री जोशी १२५

१७. कालविषयिका नागेशभट्टस्य मान्यता १३०
-डॉ. सुषमा अलंकार

१८. पूर्वत्रासिद्धमिति शास्त्रतत्त्वविमर्शः -डॉ. श्रीमन्तचटर्जी १३५

१९. जैनोक्ततत्त्वेषु मोक्षविमर्शः -डॉ. रवि १४७

२० सम्राडशोकाधारितसंस्कृतकाव्यानां विवेचनम् १५४
-सुखबीर सिंह

२१. भारतीयसंविधाने मानवाधिकारशिक्षायाः उपादेयता १६४
डॉ. प्रेमसिंहसिकरवारः

२२. वेदार्थप्रक्रियायां महर्षियास्कप्रणीतस्य आवश्यकता महर्षिदयानन्दस्वामिनां १६९
वेदार्थे निरुक्तस्य सम्प्रभावः नैरुक्तिकी दृष्टिश्च
-कारिया राजेशकुमार वासुदेवः


*****

'हरिप्रभा' वर्षम्-१९, अङ्कः-४-५ ( २०२२ ) ISSN 2278-0416

# सम्राडशोकाधारितसंस्कृतकाव्यानां विवेचनम्

सुखबीर सिंहः

महाकाव्यानां स्वरूपम् :-

महाकाव्यस्य स्वरूपं ख्यापयन् कविराजेन विश्वनाथेन साहित्यदर्पणस्य षष्ठे परिच्छेदे उक्तमस्ति-

**सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः।।३१५**
**सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः।**
**एकवंशभवाः भूपाः कुलजा बहवोऽपि वा।।३१६**
**इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयं।**
**चत्वारस्तस्य वर्गाः स्युस्तेष्वेकं च फलं भवेत्।।३१८**

एवमेव प्रकारेण तत्र महाकाव्यस्य स्वरूपं प्रकटयन् महाकाव्ये कानि-कानि आवश्यकानि तत्वानि सन्ति; तेषामपि चर्चा तत्र आचार्येण कृता वर्तते।

यत्र काव्ये महाकाव्यस्य सर्वेषां गुणानाम् आवश्यकतत्वानां समावेशो न भवति तत्र खण्डकाव्यम् इति नाम्ना तस्य काव्यस्य व्यपदेशो भवति। उक्तञ्च साहित्यदर्पणे कविराजेन-

**"खण्डकाव्यं भवेत्काव्यस्यैकदेशानुसारि च।"[१]**

किञ्च महाकाव्यस्य किं स्वरूपं भवेत्? अथवा केन प्रकारेण महाकाव्यस्य प्रणेता तस्य रचनां कुर्यात् इति प्रश्ने सति नैकानि मतानि समापतन्ति किन्तु काव्यस्य कर्ता स्वाभीष्टसिद्ध्यर्थं स्वसामर्थ्यानुसारेण स्वकीये काव्ये परिवर्तनं परिवर्धनञ्च करोति। परिणामस्वरूपे काव्यस्य नूतनानि स्वरूपाणि सहृदयानां हृदयाह्लादाय भिन्न-भिन्न-रूपेण नानाकोटिषु अस्माकं समक्षे प्रकटीभवन्ति।

सम्राजोऽशोकविषयकानि महाकाव्यानि खण्डकाव्यानि उत् वा ऐतिहासिक-महाकाव्यानि अस्माकं समक्षे समुपस्थिताः सन्त्येव। अतः काव्येषु विशेषतया ऐतिहासिक

१. साहित्यदर्पणे कारिका सं०-३२९

खण्डकाव्येषु अथवा आधुनिककाव्येषु सम्राजोऽशोकविषयकतत्वानां प्रकटीकरणाय तस्य चरितं निर्धारयितुम् अत्र अस्मिन् अध्याये चर्चा प्रस्तूयते।

**सम्राजोऽशोकविषयक-समुपलब्ध-ऐतिहासिक-महाकाव्यम् -**

सम्राजोऽशोकविषयकवर्णनं कल्हणकृत् राजतरङ्गिणी नामधेये ऐतिहासिके काव्ये प्राप्यते। अत्र इदमपि अवधेयम् अस्ति यत् राजतरङ्गिणी इति काव्यं न केवलं सम्राजोऽशोकविषयकतत्वानां वर्णनं करोति अपितु अत्र अस्मिन् महाकाव्ये काश्मीर इति प्रदेशस्य बहूनां नृपाणां वर्णनं कविना कृतं प्राप्यते एव। राजतरङ्गिणी न केवल संस्कृतस्य अपितु भारतीयेतिहासस्य काश्मीरस्य आदिमो ग्रन्थरत्नमस्ति। तरङ्गेषु विभक्तस्य अस्मिन् काव्ये अष्टतरङ्गाः सन्ति। अत्र प्रथमतरङ्गे सम्राजोऽशोकस्य तस्य पुत्र जालौकस्य च वर्णन सम्प्राप्यते। अस्य काव्यस्य रचना कल्हणमहाकविना ईस्वी सन् ११४८ तः आरभ्यः ११५० ईस्वी सन् पर्यन्तं कृतम्। राजतरङ्गिणी ऐतिहासिके काव्ये सम्राजोऽशोकस्य विषये लिखितमस्ति[१]-

प्रपौत्रः शकुनेस्तस्य भूपतेः प्रपितृव्यजः।
अथावहदशोकाख्यः सत्यसन्धो वसुन्धराम्॥
यः शान्तवृजिनो राजा प्रपन्नो जिनशासनम्।
शुष्कलेऽत्र वितस्तात्रौ तस्तार स्तूपमण्डलैः॥
धर्मारण्यविहारान्तर्वितस्तात्र पुरेऽभवत्।
यत्कृत्यं चैत्यमुत्सेधावधि प्राहपक्षसेक्षणम्।
सषण्णवत्या गेहानां लक्षैः लक्ष्मीसमुज्वलैः।
गरीयसीं पुरीं श्रीमानुश्चक्रे श्रीनगरीं नृपः।
जीर्णं श्रीविजयेशस्तत्र विनिवार्य सुधामयम्।
निष्कल्मषेणाश्ममयः प्राकारो येन कारितः।
सभायां विजयेशस्य समीपे च विनिर्ममे।
शान्तावसादः प्रसादावनशोकेश्वर संजितौ।
म्लेच्छैः संच्छादिते देशे स तदुच्छित्तये नृपः।
तपः संतोषिताल्लेभे भूतेशात्सुकृती सुतम्॥

उपर्युक्तैः श्लोकैः ज्ञायते यत् अशोकात् पूर्वं कल्हणकविना येषां नृपाणां

१. राजतरङ्गिणी प्रथमतरङ्गे श्लोक सं० १०१-१०७